**Kalika Prabha : Journal of Multidisciplinary Studies**
[ISSN:- 3021-9388 (Print)]
Published by Kalika Sanskrit Vidyapeeth (RMC) Nawalpur, Nepal
https//www.ksv.edu.np

# “सम्बोधने च” इति सूत्रार्थविमर्शः

**जगन्नाथशर्मा (विद्यावारिधिः)**

*सहप्राध्यापकः, ने.सं.वि., महेशसंस्कृतगुरुकुलविद्यापीठम्*

***Article History :** Received : 27th, Jan. 2026; Reviewed: 10th, March 2026; Accepted: 23th; June, 2026*
***Corresponding Author** : Jagannath Sharma, PhD* ***E-mail :** jagannathsharma9847@gmail.com*
***DOI :** https://doi.org/10.3126/kp.v4i1.97024* ***ORCID**: https://orcid.org/0009-0002-0708-7826*

## लेखसारः

*प्रस्तुतेऽस्मिन् शोधप्रबन्धे “सम्बोधने च” इति सूत्रार्थः सुविस्तरं प्रकाशितः। सर्वप्रथमं तु "सम्बोधने च" इति सूत्रस्य सोदाहरणमर्थवर्णनं विधाय प्रातिपदिकार्थसूत्रेण तल्लक्ष्यस्यासाध्यत्वं निरूप्य "सम्बोधने च" इति शास्त्रेण यत्र प्रथमा तस्य शाब्दबोधप्रकारस्य च निरूपणं कृत्वा तत्र च विद्यमानं प्राचीननवीनादिसम्मतं मतभेदं निरूप्य परैः दर्शनान्तरीयैः एतत्सूत्रविषय आशङ्कितानि दूषणानि निरूप्य खण्डयिष्यन्ते। तदङ्गत्वेन च सम्बधोनविभक्त्यर्थः, सम्बोधनपदार्थे विद्यमानं सम्यक्त्वं च यथाविविधमतं विमृश्य हरिग्रन्थसम्मतिमनुरुध्य विभक्त्यर्थनिरूपणं प्राचीनमतनिरसनपूर्वकं संस्थापयिष्यते। अथ तत्र नैयायिकमीमांसकानामापत्तयश्च निवारयिष्यन्ते।*

**शब्दकुञ्जी -** सम्बोधने, अभिमुखीभावः, प्रथमा, प्रयोक्ता, इच्छा।

## विषयप्रवेशः

भगवता पाणिनिना प्रणीतायामष्टाध्याय्यां द्वितीयाध्यायस्य तृतीयाध्यायस्य सप्तचत्वारिंशत्तमं सूत्रमिदम् सम्बोधने च (पाणिनिसूत्रम्.२.३.४६) इति। पूर्वसूत्रात् “प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा” इत्यस्मात् प्रथमा इत्यनुवर्तते। तथा च प्रातिपदिकार्थापेक्षया यत्र सम्बोधनस्य पदार्थस्य आधिक्येन भानं तत्र प्रथमार्थमिदं सूत्रम्। “प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमे”ति सूत्रेण प्रातिपदिकार्थे प्रथमासिद्धावपि सम्बोधनाधिक्ये प्रथमाया अप्राप्तौ सूत्रमिदमारभ्यते। यथा उदाहरणं हे राम मां पाहि इति। इह रामशब्दादनेन शास्त्रेण प्रथमाविभक्तौ सत्यां “एङ्ह्रस्वात्सम्बुद्धेः”( पाणिनिसूत्रम्.६.१.६९) इति सूत्रेण सुलोपे, हेशब्दस्य पूर्वप्रयोगे हे राम इति रूपं सिद्ध्यति। इदं सूत्रं प्रातिपदिकार्थेति सूत्रापेक्षया अग्रिमं वर्तते। भाष्यकारैः प्रातिपदिकार्थसूत्रस्थमात्रग्रहणं सम्बोधने चेति सूत्रमादाय प्रत्याख्यातम्। तत्रायमाशयः प्रातिपदिकार्थापेक्षया अधिकस्यार्थस्य भाने सति प्रथमा विभक्तिर्न भवतीति मात्रग्रहणस्य प्रयोजनम्। तत् न भवति चेत् पृथग् योगो किमर्थः? यतः मात्रग्रहणं मास्तु। यदि प्रातिपदिकार्थापेक्षया

येषामर्थानामाधिक्ये सत्यपि प्रथमाविभक्तिर्भवति तर्हि पृथक् प्रथमाविभक्तिविधानार्थं सम्बोधने च इति सूत्रं व्यर्थं सद् ज्ञापयति प्रातिपदिकार्थापेक्षया अधिकस्य भाने प्रथमाविभक्तिर्न भवतीति। एवञ्च पूर्वसूत्रवदिदमपि सूत्रं कारकविभक्तिविधायकमिति सिद्धम्। अथैतच्छास्त्रविहितविभक्त्यर्थः, तद्घटितशाब्दबोधादिविमर्शश्चेत्येवं विषयाः सुविस्तरं विमृश्यन्ते।

## लेखसमस्या

प्रकृतशोधे "सम्बोधने च" इति सूत्रविषयके इमाः समस्या भवन्ति।

क) सम्बोधने च इति सूत्रं "प्रातिपदिकार्थलिङ्गपरिणामवचनमात्रे प्रथमा" इति सूत्रेण गतार्थं न वा?

ख) सम्बधोनस्थले प्राचीननवीनसम्मत: विभक्त्यर्थ: क:?

ग) सम्बोधनमिति पदार्थे सम्यक्त्वं बोधे उत बोधने, उतोभयत्र?

घ) बोधे बोधने वा विद्यमानं सम्यक्त्वं प्राचीननवीनमतयो: किंरूपम् भवति?

ङ) सम्बोधनविभक्ते: कारकविभक्तित्वमस्ति न वा? इत्यादि ।

## लेखोद्देश्यम्

प्रकृतशोधस्य "सम्बोधने च" इति सूत्रार्थस्य विशिष्य प्रकाशनमेव प्रमुखं प्रयोजनं तदवगमनमेव च प्रयोजकमुद्देश्यं विद्यते। तदङ्गत्वेन च निम्नानां विषयाणामवगमनमुद्देश्यम् भवति

क) "सम्बोधने च" इति सूत्रस्य पूर्वसूत्रेण अगतार्थत्वावधारणम् ।

ख) प्राच्यनवीनरीत्या सम्बोधनविभक्त्यर्थावगति: ।

ग) सम्यकत्वान्वयिपदार्थनिश्चय: ।

घ) सम्यक्त्वस्वरूपनिर्धारणम् ।

ङ) सम्बोधनविभक्ते: कारकविभक्तित्वज्ञप्ति: इत्यादि ।

## शोधप्रविधिः

प्रस्तुतेऽस्मिन् शोधे सूत्रार्थस्यैव प्रतिपिपादयिषिततया प्राधान्येन व्याख्यानात्मकः प्रविधिराश्रीयते। तेनैव च विश्लेषणात्मकप्रविधिना निष्कृष्टं सम्बोधने च इति सूत्रार्थस्वरूपं निगम्यते।

## सूत्रार्थविवेचनम्

### सम्बोधनस्य विभक्त्यर्थत्वे मतभेदाः

"सम्बोधने च" इति सूत्रबलात् सम्बोधनस्य विभक्त्यर्थत्वं त्ववगतम्, परन्तु तद्धि विभक्तिवाच्यमुत विभक्तिद्योत्यमित्यत्र मतभेदा बहवो विद्यन्ते। तत्र प्राचीना सम्बोधनं विभक्तिवाच्यमित्येव वदन्ति। नवीनास्तु सम्बोधनं न विभक्तिवाच्यमपि तु विभक्तिद्योत्यमित्यभिप्रयन्ति। तत्र क्रमेण प्राचीनानां नवीनानाञ्च मतानि निरूप्यन्ते।

मतद्वयम्- प्राचीनमतम्, नवीनमतञ्च। प्राचीनमते सम्बोधनं प्रत्ययस्य अर्थः। तच्च विशेष्यम्, तथा च हे राम मां पाहीति स्थलम्। अत्र रामपदार्थस्य सम्बोधनपदार्थे अन्वयः। रामसम्बन्धिसम्बोधनम् इत्यर्थः सम्बोधनस्य च पुनः विषयतासम्बन्धेन रक्षणक्रियायामन्वयः। तथा च रामसम्बन्धिसम्बोधनविषयः मत्कर्मकं रक्षणम् इति बोधः। तर्हि रामसम्बन्धी यत्सम्बोधनम्, रामवृत्तियत्सम्बोधनं नाम रामे किं बोधयितुमिष्यते इति चेत् मत्कर्मकं रक्षणं बोधयितुमिष्यते इत्यतः सम्बोधनं नाम अभिमुखीकृत्य अज्ञातार्थज्ञानानुकूलव्यापारानुकूलो व्यापारः। अज्ञातविषयः सम्बोधनविभक्त्यन्तेन न उच्यते अर्थात् अभिमुखीकृत्य ज्ञातविषय हे राम शङ्ख श्वेतोऽस्ति, गवि पुच्छं भवति इत्यादयः प्रसिद्धाः ज्ञातविषयाः सम्बोधनविभक्त्यन्तेन नोच्यन्ते। यतो हि सिद्धविषयः सः अतः सिद्धविषयस्य अनुवादः पुनः सम्बोधनविभक्त्या न क्रियते अपि तु अज्ञातः यः अर्थः तादृशज्ञानानुकूलव्यापारानुकूलव्यापारः सम्बोधनविभक्तेरर्थः। देवदत्त मां पाहीत्यत्र अज्ञातः यः अर्थः स मत्कर्तृकं देवदत्तकर्मकं रक्षणं तद्विषयकं ज्ञानं रामे तदनुकूलो व्यापारोऽपि श्रावणप्रत्यक्षरूपः रामे, तदनुकूलव्यापारः शब्दप्रयोगरूपः अर्थात् सम्बोधनरूपः। तदेवोक्तं सम्बोधनं च अभिमुखीकृत्य अज्ञातार्थज्ञानानुकूलव्यापारानुकूलव्यापारः अर्थः। एतादृशव्यापारजन्यं यज्ज्ञानं तदनुकूलो यः व्यापारः तदाश्रयत्वं सम्बोध्यत्वम् सम्बोध्यत्वेन बुद्धः नाम अयं सम्बोध्य यदा ज्ञानं भवति।

देवदत्त मां पाहीत्यत्र सम्बोध्यत्वेन बुद्धः यो यो भवति स स स्वनिष्ठज्ञानविषयः ज्ञेयसाकाङ्क्षः इति ज्ञेये अर्थे तस्य अन्वयः। रामः यः वर्तते स सम्बोध्योऽस्ति सम्बोध्यो नाम पूर्वं किमुक्तम् ? अभिमुखीकृत्य अज्ञातार्थज्ञानानुकूलव्यापारानुकूलव्यापारजन्यज्ञानानुकूलव्यापाराश्रय इति। यतः व्यापाराश्रयः सम्बोध्यो वर्तते अतः मन्निष्ठज्ञानविषयकज्ञेयः कः ? इत्याकारकम् आकाङ्क्षाज्ञानं यदा जायते अर्थात् मन्निष्ठज्ञानविषयीभूतः अर्थः कः? इति आकाङ्क्षा भवति इति तदानीं हे राम मां पाहीत्येतद्धटक मां पाहि इत्यत्र अन्वयो भवति। अर्थात् रामकर्तृकमत्कर्मकरक्षणानुकूलज्ञानानुकूलव्यापारः यः अस्ति तज्जन्यं यज्ज्ञानमस्ति तदाश्रयः देवदत्तः। अयं देवदत्त कीदृशो भवति इति चेत् स्वनिष्ठज्ञानविषयीभूतः यः ज्ञेयः तत्साकांक्षो भवति। राम मां त्राहि इत्यनेन रामसम्बोधनविषयः रामकर्तृकमत्कर्मकं रक्षणं त्राणनमिति बोधो भवति। अर्थात् रामोद्देश्यकं रामकर्तृकं मत्कर्मकं रक्षणविषयकबोधनपर्यन्तमर्थः। यतो हि सम्बोधनविभक्तिमुद्दिश्य किञ्चिद् विधीयते। हे राम मां पाहि इत्यत्र जानीहि इति अध्याहारे रामोद्देश्यकं रामकर्तृकं मत्कर्मकं रक्षणकर्मकं ज्ञानम् इति वाक्यार्थः। सम्बोधनमपि अत्र आनीयते चेत् देवदत्तनिष्ठअभिमुखीकृत्यअज्ञातार्थज्ञानानुकूलव्यापारानुकूलव्यापारजन्यरामनिष्ठज्ञानविषयरामकर्तृकदेवदत्तकर्मकं त्राणनम् इति देवदत्तेनोक्तस्य हे राम मां त्रायस्व इति वाक्यस्य अर्थः। संक्षेपेण तु रामोद्देश्यकं मत्कर्मकं रक्षणविषयकं बोधनम्। अभिमुखीकरणं नाम स्ववचनार्थग्रहणे सादरत्वम्। स्ववचनस्य यः अर्थः तद्ग्रहणे सादरत्वम्। यथा हे राम मां पाहीत्यत्र स्ववचनं देवदत्तस्य वचनं तस्य यः अर्थः वर्तते तदर्थग्रहणे सादरत्वं भवेत् रामेण तत्र ध्यानं देयम्। अतः स्वस्यैव अंके विद्यमानायाः पार्वत्याः कृते भगवान् शिवः शृणु देवि प्रवक्ष्यामि इति सम्बोधनं पुनः पुनः कृतवान्। अथ पार्थक्येन तयोः प्राच्यनवीनयोः एतत्सूत्रविषये मतानि विशदीक्रियन्ते।

## प्राचीनमतम्

प्राचीना वैयाकरणा दीक्षितप्रभृतयः यथा परिमाणस्थले परिमाणं प्रत्ययस्य अर्थः इति वदन्ति, तद्वत् सम्बोधने च इत्यस्यापि सम्बोधनं प्रत्ययस्य अर्थ इति वदन्ति तथा च प्रकृत्यर्थस्य प्रत्ययार्थे अन्वयः। उदाहरणार्थम्- हे राम मां पाहीति प्रयोगो वर्तते। रामशब्दात् सम्बोधनविभक्तिर्विहिता तर्हि अस्य अर्थः सम्बोधनं नाम सम्यग् बोधनं, सम्यग् ज्ञापनम् इति। रामपदार्थस्य सम्बोधनपदार्थे अन्वयः। रामसम्बन्धि सम्बोधनम्। तस्य पुनः कुत्र अन्वयः ? इति चेत् मां पाहीति क्रियायामन्वयः तर्हि रामसम्बन्धिसम्बोधनविषयो मत्कर्मकं रक्षणमिति बोधः एवञ्च यथा परिमाणमात्रे प्रथमास्थले परिमाणसामान्यं यः सुप्प्रत्ययः, तस्यैव अर्थः दीक्षितमते विशेष्यो भवति। द्रोणाभिन्नं यत्परिमाणमिति प्रत्ययस्यार्थविशेष्यकबोधः तद्वत् प्राचीनमते सम्बोधनस्यार्थस्यापि प्रत्ययार्थत्वात् विशेष्यत्वं भवति। तथा च रामसम्बन्धिसम्बोधनविषयः मत्कर्मकं रक्षणमिति बोधः।

प्राचीनानां वैयाकरणानां मते बोधनाय सम्मुखीकरणं सम्बोधनमिति व्युत्पत्त्या प्रकृतवाक्यार्थविषयकबोधफलक श्रोत्रभिमुखीभाव- रूपव्यापारानुकूलव्यापारः सम्बोधनविभक्त्यर्थः। यतः प्रयोक्तृवचनार्थबोधाय अवधानादिवैशिष्ट्योपलक्षितावस्थितिरूपस्याभिमुखीभावस्य सम्बोधनपदप्रयोगे प्रतीतिः। स च सम्बोधनविभक्त्यर्थव्यापारः प्रयोजकनिष्ठा इच्छा एव। तत्र अभिमुखीभावरूपस्य सम्बोध्यनिष्ठव्यापारस्य प्रयोजकनिष्ठेच्छायां स्वानुकूलत्वं नाम स्वविषयकत्वम्। राम मां पाहीत्यत्र प्रकृत्यर्थरामपदार्थस्य सम्बोधनविभक्त्यर्थस्य प्रकृतवाक्यार्थविषयकबोधफलकाभिमुखी- भावानुकूलव्यापारस्यैकदेशे अभिमुखीभावरूपे व्यापारे वृत्तित्वसम्बन्धेनान्वयः प्रकृतवाक्यार्थविषयकबोधफलकाभिमुखीभावानुकूलव्यापारस्य प्रयोजकनिष्ठेच्छारूपस्य सम्बोधनविभक्त्यर्थस्य विषयतासम्बन्धेन पाधात्वर्थरक्षणेऽन्वयः। एवञ्च रामनिष्ठो यो प्रकृतवाक्यार्थविषयक-बोधफलकाभिमुखीभावः तद्विषयिणी या प्रयोजकनिष्ठा इच्छा तद्विषय: मत्कर्मकं त्वत्कर्तृकं प्रेरणाविषयीभूतं रक्षणमितिबोध:। अत्र अभिमुखीभावः प्रयोजकनिष्ठेच्छाविषयः तादृशाभिमुखी भावरूपव्यापारजन्यः प्रकृतवाक्यार्थविषयकबोध:। तथा सति प्रकृतवाक्यार्थविषयकबोधोऽपि स्वविषयव्यापारजन्यत्वेन इच्छाविषयः। पुनश्च प्रकृतवाक्यार्थः रामसम्बन्धिसम्बोधनविषयः रक्षणम् इच्छाविषयाभिमुखीभावरूपव्यापारजन्यबोधविषयः। अतः प्रकृतवाक्यार्थः स्वविषयव्यापारजन्यबोधविषयत्वेन इच्छाविषयः। इत्थं रामनिष्ठाभिमुखी- भावरूपव्यापारस्य इच्छाविषयत्वेन प्रकृतवाक्यार्थविषयकबोधानुकूल- व्यापाराश्रयत्वप्रकारकेच्छोद्देश्यत्वरूपं सम्बोध्यत्वं रामादौ प्रतीयते। चैत्रो मैत्रं सम्बोधयतीत्यादौ ण्यन्तबोधिधातुना प्रकृतवाक्यार्थविषय- कबोधफलकाभिमुखी-भावविषयकेच्छोद्देश्यत्वप्रकारकबोधानुकूलस्य- सम्बोधनविभक्त्यन्तशब्द प्रयोगरूपस्य व्यापारस्य अन्यनैरपेक्ष्येणैव सम्बोधनविभक्त्यन्तप्रयोगे प्रतीतिसत्त्वात् सम्बोधनं न वाक्यार्थ इति फलति। तथा चोक्तम् –

"सम्बोधनं न वाक्यार्थ इति वृद्धेभ्य आगम: "(वाक्यपदीयम्.पृ.सं-४२०) इति।

सम्बोधनस्य क्रियापेक्षत्वेऽपि विशेष्यविशेषणभाववद् वाक्यार्थत्वं नास्ति अपि तु कर्मादिसाधनवत् पदार्थत्वमेव। नीलो घटः इत्यत्र विशेष्यविशेषणबोधाय पदान्तरस्य अपेक्षा तद्वत् राम इति पदेनैव सम्बोधनस्य अर्थस्यावगतौ सम्बोधनं पदार्थः न वाक्यार्थः। तथा चोक्तम् – "सम्बोधनस्य नियमेन क्रियापेक्षत्वेऽपि 'वीरः पुरुषः'

इत्यादौ विशेषणविशेष्यभावसम्बन्धस्येव वाक्यार्थत्वं नास्ति पदान्तरनैरपेक्ष्येण सम्बोध्यत्वावगतेः, अपितु कर्मादिसाधनवत्पदार्थत्वमेवेत्याह – "सम्बोधनं न वाक्यार्थः" इति"( वाक्यपदीयम् अम्बाकर्त्रीपङ्क्तिः .पृ.सं-४२०) इति।

## नवीनमतम्

नवीनानां मते चैवं बोधो नेष्टः। भाष्यकारैः प्रातिपदिकार्थसूत्रे मात्रग्रहणं प्रत्याख्यातम्। प्रातिपदिकार्थसूत्रे च ये अर्थाः उपात्ताः सन्ति ते सर्वेऽपि प्रकृत्या एव गम्या। प्रातिपदिकात् प्रातिपदिकार्थे प्रतीयमाने प्रथमा। परिमाणार्थे विद्यमानात् प्रातिपदिकात् प्रथमा इति यथा तत्रार्थः अस्ति तद्वत् सम्बोधने च इत्यनेन सम्बोधने विद्यमानात् प्रातिपदिकात् प्रथमा भवति। अन्येषामर्थानामाधिक्ये प्रथमाविभक्तिर्नभवति इति सजातीयविषयत्वात् ज्ञापयितुं शक्यते। इत्थमेतत्सूत्रप्रामाण्यात् सम्बोधने चेति सूत्रेण विधीयमानस्य सुप्रत्ययस्य अर्थोऽपि द्योत्य एव भवति न अपूर्वतया वाच्यो भवति अर्थात् प्रातिपदिकादेव सम्बोधनार्थोऽपि भाषते इति नवीनानां मतम्। यद्यपि अर्थस्तु प्रातिपदिकार्थापेक्षया यत्र परिमाणाधिक्यार्थो भासते तत्र विद्यमानात् प्रातिपदिकात् प्रथमा यथा तद्वदर्थः प्रातिपदिकार्थापेक्षया यत्र सम्बोधनाधिक्यार्थः भासते तत्र विद्यमानात् प्रातिपदिकात् प्रथमा इति तेषां तेषां पदानामर्थः। मात्रग्रहणाभावे कथमेतादृशार्थः आयाति इति चेद् ज्ञापनादेव आगच्छति। मात्रग्रहणाभावे इदानीं प्रातिपदिकार्थलिङ्गपरिमाणवचनेषु प्रथमा इत्यर्थो भवति। एवं सति सम्बोधने च इति सूत्रान्तरमस्ति तथा च मात्रग्रहणं न स्थाप्यते यदा तदा प्रातिपदिकार्थे प्रथमा इति सर्वत्र नियतो भवति। अस्माभिः किं व्यावर्तनमस्ति ? प्रातिपदिकार्थापेक्षया अधिकानामन्येषामर्थानामाधिक्ये प्रथमाविभक्तिः स्यात् तर्हि सम्बोधनाधिक्येऽपि प्रथमाविभक्तिः सिद्धैव इत्यतः पुनः सम्बोधने चेति सूत्रारम्भः व्यर्थं सज्ज्ञापयति प्रातिपदिकार्थमात्रे प्रथमा भवतीति। अतः मात्रग्रहणं विनापि मात्रग्रहणं लभ्यते इत्यतः भाष्यकारैः मात्रग्रहणं प्रत्याख्यातम्, सम्बोधने च इति ज्ञापकात्। अस्माद् भाष्यात् किं लभ्यते ? इति चेत् सम्बोधने च इत्यपि प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा इत्यनेन सजातीयमेव अस्ति अन्यथा सम्बोधने च इत्यस्य प्रत्ययार्थे विधानार्थं भवेत् तथा च सम्बोधने अर्थे प्रत्ययविधानेन तस्य चारितार्थ्यं स्यात्। इदानीं प्रातिपदिकार्थसूत्रे तु प्रातिपदिकार्थे विद्यमानात् प्रातिपदिकात् प्रथमाविधानम् इति विजातीयत्वात् ज्ञाप्यज्ञापकभावो न सङ्गच्छेत। अतः इदमपि प्रमाणं भवतीति नागेशभट्टानामाशयः। इत्थं किं वैलक्षण्यमागतमिति चेत् एतेषां मते प्रत्ययार्थः प्रकृत्यर्थे विशेषणं भवतीत्येव विशेषः।

अत्र कश्चन प्रश्नो भवति सम्बोधनं नाम किमिति अन्ततोगत्वा सिद्धान्तः क्रियते सिद्धस्याभिमुखी भावमात्रं सम्बोधनं विदुः। सम्बोधनं नाम अभिमुखीभाव इत्यर्थः सिद्धान्तोऽस्ति तर्हि अभिमुखीभावः सम्बोधनम् इत्युक्ते अभिमुखीभावस्तु क्रिया। तर्हि क्रिया प्रातिपदिकगम्या कथं भवति ? पञ्चकं प्रातिपदिकार्थः इति सिद्धान्तो वर्तते यदि स्वार्थद्रव्यलिङ्गसंख्याकारकमेव प्रातिपदिकार्थो भवेत् तर्हि इदानीं हे राम इत्यत्र रामपदेन अभिमुखीभावः कथमुच्यते अतः वक्तव्यमिदं पञ्चकं प्रातिपदिकार्थमिति व्यभिचरितमस्ति। षोढा प्रातिपदिकार्थस्तु स्वीकृत एव अस्माभिः शब्दोऽपि प्रातिपदिकार्थत्वात्। तत्र च प्रमाणम् -

ग्राह्यत्वं ग्राहकत्वञ्च द्वे शक्ती तेजसो यथा।

तथैव सर्वशब्दानामेते पृथगवस्थिते॥(वाक्यपदीयम्.१.५६) इति।

इति भर्तृहरिश्लोकोऽपि प्रमाणम्। इत्थं षोढा प्रातिपदिकार्थः निश्चितो वर्तते। कदाचिच्च षोढा प्रातिपदिकार्थोऽपि व्यभिचरति कुत्र ? इति चेत् द्रोणशब्दादिषु। तत्र द्रोणः, द्रोणशब्दत्वं, पुंस्त्वं, संख्या, कारकम्, परिमाणञ्च इति कृत्वा पञ्चकापेक्षया अतिरिक्तं परिमाणमपि द्रोणशब्दार्थत्वेन स्वीकृतमस्ति। द्रोणशब्दोऽपि स्वीकृतः तत्सर्वमाहत्य सप्तप्रातिपदिकार्थाः सम्मताः तत्र परिमाणग्रहणस्वारस्यात्। अत्रापि सम्बोधनसहिताः सप्तापि प्रातिपदिकार्थाः स्वीकर्तुं शक्यन्ते। यतो हि परमसिद्धान्ते गम्यते चेद् अर्थे प्रथमा इत्येव सारं स्वीक्रियते अन्यथा सम्पूर्णसूत्रपक्षे तु सूत्रघटकपदानि समर्थनीयानि इत्यतः नियतोपस्थितिकः प्रातिपदिकार्थः इत्युक्तम् अत एव खलु अन्ते दीक्षितैरुक्तम् ज्ञापनेन किमपि विशिष्टं प्रयोजनं साधयितुं न शक्यते इत्यतः अन्ते गत्वा अर्थे प्रथमा इत्येव सारमभिहितम्। इत्थं अर्थे प्रथमा इत्येव सारमिति वदतः दीक्षितस्य मतेऽपि सम्बोधने च इत्यस्य वैयर्थ्यन्तु नास्ति। कुतः वैयर्थ्यन्नास्ति इति चेत् प्रत्ययार्थत्वमस्ति अस्य अतः वैयर्थ्यन्नास्ति किन्तु नागेशमते प्रत्ययार्थः सम्बोधनं चेत् प्रकृत्या अभिमुखीभावो वक्तव्यः, सप्तकं प्रातिपदिकार्थः इति नागेशभट्टेन मूले तु नोक्तम् किन्तु प्रत्ययार्थः प्रकृत्यर्थे अन्वेति तूक्तम्। तेन परिमाणसामान्यमपि आगच्छति इति तु कथं वक्तुं शक्यते इति तु वक्तव्यं सप्तकं प्रातिपदिकार्थः इत्यपि कथमायाति इति चेत् परिमाणसामान्यमपि द्रोणशब्दस्य अर्थः इति नागेशाशयः। एवञ्च तत्रेवात्रापि सम्बोधनमपि प्रातिपदिकार्थः, एवञ्च सम्बोधने गम्ये प्रथमा इति सूत्रार्थत्वात् सम्बोधनं न प्रत्ययार्थः अपि तु प्रकृत्यर्थ एव इति नवीनानां मतम्।

सम्बोधनपदार्थश्च तत्क्रियायां विशेषणम्॥(वाक्यपदीयम्.२.५) इति॥

## सम्बोधनपदार्थः

अथ सम्बोधनपदार्थः विचार्यते। तथा हि समुपसर्गपूर्वकात् बुध अवगमने इति धातोः णिजन्तात् ल्युटि सति इदं रूपं सिद्ध्यति। तत्र समुपसर्गेण ज्ञापने सम्यक्त्वं प्रतिपाद्यते। तद्धि अवश्यकर्तव्यत्वप्रकारकबोधजनकत्वरूपम्। यथा चैत्र जलमाहर इत्यादौ जलाहरणं मदवश्यकर्तव्यमिति ज्ञानविषयत्वं जलाहरणे विद्यते इत्यतो लक्षणसमन्वयो भवति। अत्र केचन प्रयोक्त्रिच्छाविषयत्वं ज्ञापने सम्यक्त्वमिति वदन्ति। जलाहरणं प्रयोक्त्रिच्छाविषय इत्यतः तत्त्वमेव सम्यक्त्वमिति। तत्रोच्यते नेदं युक्तम्, यतोऽनन्यलभ्यः शब्दार्थः इति न्यायेन वाक्यप्रयोगेणानुमेयस्य तस्य सम्बोधनविभक्त्यर्थत्वासम्भवात्। ननु तस्य वाक्यप्रयोगानुमेयत्वमुत सम्बोधनविभक्त्यन्तत्वमित्यत्र किं विनिगमकमिति चेत्, तत्र वदामः

सम्बोधनविभक्त्यन्तपदाघटितस्थलेऽपि त्वं पच इत्यादौ चैत्रनिष्ठपाकविषयकबोधे प्रयोक्तृइच्छाविषयविषयकत्वमनुमानलब्धम्। अत्र देवदत्तीयइच्छाविषयकत्वमनुमानलब्धम्। चैत्रनिष्ठस्वकर्तृकओदनादिकर्मकपाकविषयकबोधः देवदत्तीयइच्छाविषयविषयकः चैत्रः पचेद् इत्याकारकदेवदत्तीयवाक्यप्रयोगप्रयोक्तृत्वात् इत्यनुमानं भवति। एतादृशेन अनुमानेन अत्रापि देवदत्तीयइच्छाविषयविषयकत्वं चैत्रीयबोधे भाषते तथा च सम्बोधनविभक्त्यन्तपदस्य अघटितस्थलेऽपि

बोध्यीयचैत्रनिष्ठपाकविषयकबोधे देवदत्तीयइच्छाविषयविषयकत्वम् अनुमीयते इत्यतः सम्बोधनविभक्तेरेव अयमर्थः इति वक्तुं न शक्यते। अन्यथा तस्य तत्प्रयोक्तृत्वमेव न स्यात्। इदानीं मध्ये विचिकित्सा उत्तिष्ठते व्यभिचारशङ्कया। तथा हि पर्वतो वह्निमान् धूमात् इत्यत्र हेतुरस्तु साध्यं मास्तु इति कैश्चित् आक्षिप्य धूमोऽस्तु वह्निर्मास्तु इति उच्यते चेत् व्यभिचारशङ्कानिवर्तकः अनुकूलतर्कः दीयते यदि धूमो वह्नेर्व्यभिचारी स्यात् तर्हि वह्निजन्यो न स्यात् इति। यदि धूमः वह्निजन्यो न स्यात् तर्हि धूमार्थिनस्तव वह्नौ प्रवृत्तिर्न स्यात् इत्यनुकूलस्तर्कः दीयते तथैवात्र नास्ति इति नाशङ्कनीयम्।

यदि उच्यते भवतात्र तथा अप्रयोजकत्वशङ्का चैत्रः पचेत् इत्याकारकवाक्यप्रयोगप्रयोक्तृत्वम् अस्तु नाम (हेतुरस्तु) देवदत्तीयइच्छाविषयविषयकत्वम् मास्तु (साध्यं मास्तु) इति चेत् यदि देवदत्तीयइच्छाविषयविषयकत्वम् एतादृशबोधे न स्यात् अर्थात् यदि देवदत्तीयइच्छाविषयविषयकत्वं चैत्रवृत्तिस्वकर्तृकओदनादिकर्मकपाकविषयकबोधे न स्यात् तर्हि तादृशचैत्रीयपाकविषयकबोधे देवदत्तीयचैत्रः पचेत् इत्याकारक वाक्यप्रयोगप्रयोक्तृत्वं न स्यात्। एवमेव हे राम मां पाहीति देवदत्तीयवाक्यस्थलेऽपि रामनिष्ठस्वकर्तृकदेवदत्तकर्मकरक्षणविषयकबोधे यदि देवदत्तीयइच्छाविषयविषयकत्वं न स्यात् तर्हि देवदत्तीयहे राम मां पाहीत्याकारकवाक्यप्रयोगप्रयोक्तृत्वं रामनिष्ठस्वकर्तृकदेवदत्तकर्मकरक्षणविषयकबोधे न स्यात् परन्तु अस्ति च तत्त्वम् कुतः? प्रत्यक्षदृष्टत्वात्, कथमिति चेत् यदा हे देवदत्त जलम् आहर इति प्रयोजकेन यज्ञदत्तेन वाक्यप्रयोगः क्रियते तदानीं जलमानीयते देवदत्तेन। किमर्थं वदनानन्तरमेव देवदत्तः जलमाहरति इति चेत् तत्र देवदत्तस्य कृतिः दृश्यते देवदत्तः जलमाहरति तादृशकृतिदर्शनात् तादृशज्ञानमपि अस्ति इति ज्ञानेच्छाकृतीनां सविषयकत्वनियमात्। तर्हि देवदत्ते इदानीं मया जलमाहरणीयम् इति बोधो जायते तादृशबोधः देवदत्त जलमाहर इति वाक्यप्रयोगप्रयुक्तो भवति इत्यपि प्रत्यक्षदृष्टोऽस्ति। यदि भवता देवदत्ते इच्छाविषयविषयकत्वं नोच्यते तदानीम् एतादृशवाक्यप्रयोगप्रयोक्तृत्वमपि न स्यादिति अनुकूलस्तर्कः अस्माकं मतेऽपि वर्तते इत्युक्तम्। तदेवोच्यते ग्रन्थकारेण त्वं पच इत्यादौ प्रयोज्यप्रवृत्तेस्तदिष्टत्वस्य प्रवर्तनानुमेयत्वदर्शनाच्च। त्वं पच इत्यत्र सम्बोधनविभक्त्यन्तपदाघटितस्थलेऽपि चैत्रः पचेत् इति उदाहरणवज्ज्ञेयम् पूर्वं त्वं पच इत्येव अकथयित्वा चैत्रः पचेत् इति किमर्थं उक्तम् इति चेत् सम्बोधनविभक्त्यन्तपदघटितवाक्यप्रयोगाभावेऽपि युस्मच्छब्दस्यैव अर्थोऽपि सम्बोधनार्थः इत्युच्यते बहुत्र। युस्मच्छब्दस्य सम्बोधनपदार्थे शक्तिरिति प्रायेण वदन्ति अतः युस्मदस्मदोः सम्बोधनपदार्थे शक्तिर्भवतीति वदन्ति। हे राम मां पाहि, हे राम त्वं गच्छ इत्यादौ सम्बोधनपदार्थे शक्तिर्भवति। युस्मदर्थः (त्वम्) सदा सम्बोध्यो भवति। सम्बोधनविभक्तेः यः अर्थः निस्सरति स एवार्थः युस्मच्छब्दादपि आगच्छतीति त्वं पच इत्युदाहरणेऽपि सम्बोधनविभक्तेः अविद्यमानत्वेऽपि सम्बोधनविभक्त्यर्थस्तु त्वं पदेनोच्यते इति केचित् नाक्षिपेयुः एतदर्थं त्वं पच इति अनुक्त्वैव चैत्रः पचेत् इति उदाहरणं पूर्वमुक्तम्। इदानीं त्वं पच इत्यनेन प्रवर्तनारूपः अर्थः विषयीक्रियते पच इति लोट्लकारेण तर्हि तत्र यथा प्रवर्तनया तदिष्टत्वम् अनुमीयते इष्टत्वं नाम इच्छाविषयत्वम्। अनुमानाकारः पाकः इष्टसाधनं प्रवर्तनाविषयत्वाद् इत्यस्ति। एवमेवात्रापि प्रयोक्त्रिच्छाविषयत्वं वाक्यप्रयोगानुमेयमस्ति इत्यतः स न विभक्त्यर्थ इति भावः। परन्त्वत्र नवीनाः सम्बोधनं केवलं अभिमुखीभावमात्ररूपमिति वदन्ति। अत एव हरिग्रन्थः -

सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः॥(वाक्यपदीयम्.३.७.१६३)

इति सङ्गच्छन्ते । अत्र मीमांसकाः केचन सम्बोधनस्य आख्यातार्थे अन्वय इति वदन्ति, परन्तु, तन्न युक्तम्। व्रजानि देवदत्त इत्यादौ निघातसिद्धये तस्य क्रियायामन्वयस्यानिवार्यत्वात् । अत एवोक्तम् –

## उपसंहारः

इत्थं लेखेऽस्मिन् 'सम्बोधने च' इति सूत्रं साङ्गोपाङ्गं विचारित:। प्रथमाविधायकं शास्त्रमिदं सम्बोधनस्याधिक्ये प्रथमां विभक्ति विधत्ते । तत्र प्रथमाया: कारकविभक्तित्वमस्ति न वा? पूर्वसूत्रेणेदं सूत्रं गतार्थं न वा? अनेन शास्त्रेण विहिताया: विभक्ते: कोऽर्थ:? इत्यादिभि: विविधै: विषयै: शोधोऽयं "सम्बोधने च" इति सूत्रस्य निष्कृष्टार्थं गमयति। एततसूत्रविहितप्रथमाविभक्त्यन्तस्थले तादृशप्रथमाविभक्त्यन्तघटितवाक्यस्थले च शाब्दबोधे विविधा: मतभेदा: सन्ति। तत्र दर्शनान्तरीयसम्मता मतभेदाश्च व्याकरणशास्त्रे सर्वत्र विषये नान्तरीयकाश्चेदपि व्याकरणदर्शनेऽपि प्राचीननवीनरीत्यापि मतभेदा: इह सूत्रार्थं वैविध्येन प्रकाशयन्ति। येन हि सूत्रमिदं बहुविषयकत्वेन व्यापृतं भवति। अत: लेखेऽस्मिन् तानि सर्वाण्यपि मतान्याकलय्य प्राधान्यत: लघुबृहच्छब्दरत्नप्रौढमनोरमालघुशब्देन्दुशेखरभूषणसारमञ्जूषादिग्रन्थान् आधारीकृत्य क्वचिदंशेषु दर्शनान्तरीयभाट्टकौस्तुभव्युत्पत्तिवादादिग्रन्थांश्चादाय सिद्धान्ता: लेखेऽस्मिन् प्रतिपादिता: । तत्र परमतानि विवृत्य प्रतिकूलं तच्च निरस्य प्राचीननवीनमतयोश्च नवीनमतप्राधान्यमुखेन सूत्रमिदं प्रकाशितमिति शिवम् ।

## सन्दर्भग्रन्थाः

नागेशः (ई.१९२५), वैयाकरणसिद्धान्तलघुमञ्जूषा, (कलासमवेता), विद्याविलासप्रकाशनम्।

नागेशः (ई.१९९८), लघुशब्देन्दुशेखरः (षड्व्याख्यासमन्वितः), चौखम्बासुरभारतीप्रकाशनम्।

नागेशः (ई.२०१५), लघुशब्देन्दुशेखरः,चौखम्बाप्रकाशनम्, वाराणसी।

पतञ्जलिः, (ई.२०२१),महाभाष्यम् (प्रदीपोद्योतसमवेतम्), चौखम्बासुरभारतीप्रकाशनम्।

भट्टोजिदीक्षितः(ई.१९९६), सिद्धान्तकौमुदी(लक्ष्मीव्याख्यासमन्विता) मोतीलालबनारसीदासः।

भट्टोजिदीक्षितः(वि.सं.२०७५), प्रौढमनोरमा(शब्दरत्नभूषिता), चौखम्बासंस्कृतभवनम्।

भट्टोजिदीक्षितः, (वि.सं.२०६७), सिद्धान्तकौमुदी, (तत्त्वबोधिनीबालमनोरमाभूषिता), चौखम्बासुरभारती-प्रकाशनम्।

भर्तृहरिः, (ई.१९९१), वाक्यपदीयम्, (प्रकाशाम्बाकर्त्रीसमवेतम्), सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

भट्टोजिदीक्षितः, (२०५३), सिद्धान्तकौमुदी (लक्ष्मीव्याख्यासमन्विता) मोतीलालबनारसीदासः।